**WS2S81**

# Thiruvananthapuram Edl Dist Sanskrit Worksheet 1

## STD X

पाठ:१

आयुरारोग्यसौख्यम् ।



## प्रवर्तनम् १

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१.भूगतौ अश्विनीसुतौ कौ?

(भयक्रोधः, सुखदुःखः, परिश्रमो मिताहारः)

२.सुखदुःखयोः कर्ता कः?

(आत्मा, मनः, बुद्धिः)

३.चरकेन विरचितं ग्रन्थं किम् ?

(चाणक्यनीतिः,सुभाषितावलिः, चरकसंहिता)

४.लाभानां श्रेष्ठं किम्?

(श्रुतम्, दाक्ष्यम्, आरोग्यम्)

५.इतिहासकाव्यं किम् ?

(रघुवंशम्, महाभारतम्, कुमारसम्भवम्)

## प्रवर्तनम् २

**उदाहरणानुसारं समानार्थकपदानि कोष्ठकात् निर्धार्य लिखत ।**

( व्यायामः, आरोग्यं, सामर्थ्यं, लुब्धः)

| | | |
|---|---|---|
| उदा: | दाक्ष्यम् | सामर्थ्यम् |
| | लोलुपः | ............... |
| | स्वास्थ्यम् | ............... |
| | परिश्रमः | ............... |

TVM EDL DIST

WS2S81

## प्रवर्तनम् ३

**छात्राः यूयं श्लोकेषु विद्यमानानां सन्धियुक्त पदानां पदच्छेदं कृतवन्तः खलु। एवं अधोदत्तपदानां अपि पदच्छेदं कुर्वन्तु ।**

**उदा:- नैव = न + एव।**

तेनैव= ---- + ----- ।

चैव = ---- + ------।

अत्रैव=----- + ------।

तत्रैव=----- + ------।

उदा:- **तावनादृत्य = तौ + अनादृत्य।**

उभावपि=--------- + -------।

नायकावपि= ------- + -------।

तावपि = ---------- + ---------।

## प्रवर्तनम् ४

**उदाहरणानुसारम् एकपदं लिखत।**

**उदा:- मितश्च असौ आहारः च - मिताहारः।**

हितश्च असौ आहारः च - ----------।

TVM EDL DIST

WS2S81

## प्रवर्तनम् ५

उदाहरणानुसारं विग्रहवाक्यं लिखत।

उदा:- सुखदु:खे - सुखं च दु:खं च सुखदु:खे।

शीतोष्णे- --------------------------।

## प्रवर्तनम् ६

आत्मानमेव मन्येत
कर्तारं सुखदु:खयो:।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

कोष्ठकात् उचितपदानि स्वीकृत्य श्लोकस्य आशयं लिखत।

(दु:खस्य, नास्ति, मार्गं,कर्म,भयस्य)

जीविते सुखस्य --------च हेतु: स्वस्य -------- एवेति अवगच्छेत्।एवं तर्हि महत्तरं --------- प्राप्नुयात् एतत् विषये --------आवश्यकता ---------इत्याशय:।

## प्रवर्तनम् ७

प्रियछात्रा: श्लोकात् अधोदत्तानां प्रश्नानाम् उत्तराणि दातुं शक्यन्ते वा ? श्रमं कुर्वन्तु ।

धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम्।
लाभानां श्रेष्ठमारोग्यं
सुखानां तुष्टिरुत्तमा।।

क) धनानामुत्तमं किम् ?

TVM EDL DIST

ख) ' तृप्तिः ' इत्यर्थकं पदं श्लोकात् चित्वा लिखत ।

ग) ' श्रेष्ठमारोग्यम् ' इति पदं विश्लेषयत ।

घ) लाभानां श्रेष्ठं किम् ?

## प्रवर्तनम् ८

आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति ।।

" **भोजनावसरे ईर्ष्यादिभावनां विहाय स्वस्थःभवेत्** "। आशयमिमं कस्य श्लोकस्य इति विवेचयतु ।

TVM EDL DIST

## प्रवर्तनम् ९

**पाठभागस्थानां श्लोकानां अवगमनाय गद्यरूपेण परिवर्तनम् करणीयम्।अधोदत्तानि सूचनान्युपयुज्य गद्यरूपेण लिखत।**

कः) परिश्रमः----------भूगतौ---- तौ------अन्यं वैद्यम् अहं नैव-------।

(समाश्रये, मिताहारः, अनादृत्य, अश्विनीसुतौ)

ख)-------शनैः-----शनैःशनैः------आरुहेत्-----शनैः-----शनैःच शनैः----च।

(विद्या,धर्मः, अर्थः, व्यायामः,पर्वतम्, पन्थाः)

WS2S81

## प्रवर्तनम् १०

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये ।।

छात्रा ! अयं श्लोकः उत्तमः खलु । श्लोकस्य आशयमपि अत्युत्तमम्। श्लोकस्य आस्वादनटिप्पणीं लिखिष्यामः वा ? अधोदत्तानि सूचकान्यपि यथोचितम् उपयोक्तव्यम् ।

- अश्विनीकुमारौ अनादृत्य अहम् अन्यं वैद्यं न समाश्रये ।
- परिश्रमस्य मिताहारस्य च आवश्यकता वर्णयति ।
- परिश्रमः मिताहारः भूगतौ अश्विनीसुतौ भवतः ।
- ऐतरेयब्राह्मणात् उद्धृतः अयं श्लोकः ।
- लोकोपकारप्रदः आशयः एव ।
- अतः एतत् श्लोकः मम इष्टतमश्लोकः भवति ।
- ये जनाः व्यायामः आहारमितत्वं च अनुशीलयन्ति तेषां कृते अन्यस्य वैद्यस्य आवश्यकता नास्ति।

TVM EDL DIST